ॐ

Śrī Sāī Rām

# ॥ श्रीरुद्रप्रश्नः ॥

## śrīrudrapraśnaḥ

*Anuvakam 7*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 1 | नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒<br>namo̍ dundu̱bhyā̍ya cāhana̱nyā̍ya ca̱ | नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒<br>namo̍ dundu̱bhyā̍ya cāhana̱nyā̍ya ca̱ |
| 2 | नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒<br>namo̍ dhṛ̱ṣṇave̍ ca pramṛ̱śāya̍ ca̱ | नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒<br>namo̍ dhṛ̱ṣṇave̍ ca pramṛ̱śāya̍ ca̱ |
| 3 | नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒<br>namo̍ dū̱tāya̍ ca̱ prahi̍tāya ca̱ | नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒<br>namo̍ dū̱tāya̍ ca̱ prahi̍tāya ca̱ |
| 4 | नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒<br>namo̍ niṣa̱ṅgiṇe̍ ceṣudhi̱mate̍ ca̱ | नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒<br>namo̍ niṣa̱ṅgiṇe̍ ceṣudhi̱mate̍ ca̱ |
| 5 | नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒<br>nama̍stī̱kṣṇeṣa̍ve cāyu̱dhine̍ ca̱ | नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒<br>nama̍stī̱kṣṇeṣa̍ve cāyu̱dhine̍ ca̱ |
| 6 | नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च॒<br>nama̍ḥ svāyu̱dhāya̍ ca su̱dhanva̍ne ca̱ | नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च॒<br>nama̍ḥ svāyu̱dhāya̍ ca su̱dhanva̍ne ca̱ |
| 7 | नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒<br>nama̱ḥ srutyā̍ya ca̱ pathyā̍ya ca̱ | नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒<br>nama̱ḥ srutyā̍ya ca̱ pathyā̍ya ca̱ |
| 8 | नम॑ः का॒ट्या॑य च नी॒प्या॑य च॒<br>nama̍ḥ kā̱ṭyā̍ya ca nī̱pyā̍ya ca̱ | नम॑ः का॒ट्या॑य च नी॒प्या॑य च॒<br>nama̍ḥ kā̱ṭyā̍ya ca nī̱pyā̍ya ca̱ |

[1] *To follow the learning column, where each śloka is divided into many parts and each part is chanted twice, please refer to Sri-Rudram-Learning-Method-1-Anuvakam-7.mp3.*

[2] *To follow continuous chanting column, where the śloka is chanted without interruption and repeated once, please refer to Sri-Rudram-Learning-Method-2-Anuvakam-7.mp3 or Sri-Rudram-Learning-Method-3-Anuvakam-7.mp3 where no repetition accrues.*

| | Learning[1] | Continous chanting[2] |
|---|---|---|
| 9 | नम॒ः सूद्या॑य च सर॒स्या॑य च॒<br>nama̱ḥ sūdyā̍ya ca sara̱syā̍ya ca̱ | नम॒ः सूद्या॑य च सर॒स्या॑य च॒<br>nama̱ḥ sūdyā̍ya ca sara̱syā̍ya ca̱ |
| 10 | नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒<br>namo̍ nā̱dyāya̍ ca vaiśa̱ntāya̍ ca̱ | नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒<br>namo̍ nā̱dyāya̍ ca vaiśa̱ntāya̍ ca̱ |
| 11 | नम॒ः कूप्या॑य चाव॒ट्या॑य च॒<br>nama̱ḥ kūpyā̍ya cāva̱ṭyā̍ya ca̱ | नम॒ः कूप्या॑य चाव॒ट्या॑य च॒<br>nama̱ḥ kūpyā̍ya cāva̱ṭyā̍ya ca̱ |
| 12 | नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒<br>namo̱ varṣyā̍ya cāva̱rṣyāya̍ ca̱ | नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒<br>namo̱ varṣyā̍ya cāva̱rṣyāya̍ ca̱ |
| 13 | नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒<br>namo̍ me̱ghyā̍ya ca vidyu̱tyā̍ya ca̱ | नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒<br>namo̍ me̱ghyā̍ya ca vidyu̱tyā̍ya ca̱ |
| 14 | नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒<br>nama̍ ī̱dhriyā̍ya cāta̱pyā̍ya ca̱ | नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒<br>nama̍ ī̱dhriyā̍ya cāta̱pyā̍ya ca̱ |
| 15 | नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒<br>namo̱ vātyā̍ya ca̱ reṣmi̍yāya ca̱ | नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒<br>namo̱ vātyā̍ya ca̱ reṣmi̍yāya ca̱ |
| 16 | नमो॑ वास्त॒व्या॑य च वास्तु॒ पाय॑ च<br>namo̍ vāsta̱vyā̍ya ca vāstu̱ pāya̍ ca | नमो॑ वास्त॒व्या॑य च वास्तु॒ पाय॑ च॥<br>namo̍ vāsta̱vyā̍ya ca vāstu̱ pāya̍ ca |